अल्पदोषेन्धनः क्षीणः क्षीणेन्धन इवानलः। दोषोऽल्पोऽनिलसंभूतो ज्वरोत्सृष्टस्य वा पुनः। धातुमन्यतमं प्राप्य करोति विषमज्वरम्। सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः। मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः। कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम्। केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम्। सप्ताहं वा दशाहं वा द्वादशाहमथापि वा। सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते। अहोरात्रे सन्ततको द्वौ कालावनुवर्त्तते। अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते। तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः। वातेनोद्धूयमानस्तु यथा पूर्य्येत सागरः। वातेनोदीरितास्तद्वद्दोषाः कुर्व्वन्ति वै ज्वरान्। यथा वेगागमे वेलां छादयित्वा महोदधेः। वेगहानौ तदेवाम्भस्तत्रैवान्तर्निधीयते। दोषवेगोदये तद्वदुदीर्य्येत ज्वरोऽस्य वै। वेगहानौ प्रशाम्येत यथाम्भः सागरे तथा। विविधेनाभिघातेन ज्वरो यः संप्रवर्त्तते। यथा दोषप्रकोपन्तु तथा मन्येत तं ज्वरम्। श्यावास्यता विषकृते दाहातीसारहृद्ग्रहाः। अभक्तरुक्पिपासा च तोदो मूर्च्छा बलक्षयः। ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा। कामजे चित्तविभ्रंशस्तन्द्रालस्यमभक्तरुक्। हृदये वेदना चास्य गात्रञ्च परिशुष्यति। भयात् प्रलापः शोकाच्च भवेत्कोपाच्च वेपथुः। अभिचाराभिशापाभ्यां मोहस्तृष्णाभिजायते। भूताभिषङ्गादुद्वेगहास्यकम्पनरोदनम्। श्रमक्षयाभिघातेभ्यो देहिनां कुपितोऽनिलः। पूरयित्वाखिलं देहं ज्वरमापादयेद्भृशम्। रोगाणां तु समुत्थानाद्विदाहागन्तुतस्तथा। ज्वरोऽपरः सम्भवति तैस्तैरन्यैश्च हेतुभिः। दोषाणां स तु लिङ्गानि कदाचिन्नातिवर्त्तते। गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया। आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च। हतप्रभेन्द्रियं क्षामं दुरात्मानमुपद्रुतम्। गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्ज्जयेत्। हीनमध्याधिकैर्दोषैस्त्रिसप्तद्वादशाहिकः। ज्वरवेगो भवेत्तीव्रो यथापूर्व्वं सुखक्रियः। इति ज्वराः समाख्याता कर्म्मेदानीं प्रवक्ष्यते"।

ज्वरभेदे क्रियाभेदः सुश्रु० उ० त० उक्तो यथा

"ज्वरस्य पूर्व्वरूपेषु वर्त्तमानेषु बुद्धिमान्। पाययेत घृतं स्वच्छं ततः स लभते सुखम्। विधिर्मारुतजेष्वेष पैत्तिकेषु विरेचनम्। मृदु प्रच्छर्द्दनं तद्वत्कफजेषु विधीयते। सर्व्वं द्विदोषजेषूक्तं यथादोषं विकल्पयेत्। अल्पाहनीयोऽशोध्यश्च संशोध्यो लङ्घनादिना। रूपप्राप्यपयोर्विद्यान्नानात्वं वह्निधूमवत्। प्रव्यक्तरूपेषु हितमेकान्तेनापतर्पणम्। आमाशयस्थे दोषे तु सोत्क्लेशे वमनं परम्। आनद्धः स्तिमितैर्दोषैर्य्यावन्तं कालमातुरः। कुर्य्यादनशनं तावत्ततः संसर्गमाचरेत्। न लङ्घयेन्मारुतजे क्षयजे मानसे तथा। अलङ्घ्याश्चापि ये पूर्व्वं द्विव्रणीये प्रकीर्त्तिताः। अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्। ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम्। सृष्टमारुतविण्मूत्रं क्षुत्पिपासाऽसहं लघुम्। प्रसन्नात्मेन्द्रियं क्षामं नरं विद्यात् सुलङ्घितम्। बलक्षयस्तृष्णाशोषस्तन्द्रानिद्राभ्रमक्लमाः। उपद्रवाश्च श्वासाद्याः सम्भवन्त्यतिलङ्घनात्। दीपनं कफविच्छेदि पित्तवातानुलोमनम्। कफवातज्वरार्त्तेभ्यो हितमुष्णाम्बु तृट्छिदम्। तद्धि मार्द्दवकृद्दोषस्रोतसां शीतमन्यथा। सेव्यमानेन तोयेन ज्वरः शीतेन वर्द्धते। पित्तमद्यविषोत्थेषु शीतलं तिक्तकैः शृतम्। गाङ्गेयनागरोशीरपर्पटोदीच्यचन्दनैः। दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा। अन्नकाले हिता पेया यथास्वम्पाचनैः कृता। बहुदोषस्य मन्दाग्नेः सप्तरात्रात्परं ज्वरे। लङ्घनान्तैर्यवागूभिर्यदा दोषो न पच्यते। तदा तं मुखवैरस्यतृष्णारोचकनाशनैः। कषायैः पाचनैर्हृद्यैर्ज्वरघ्नैः समुपाचरेत्। पञ्चमूलीकषायन्तु पाचनं पवनज्वरे। सक्षौद्रं पैत्तिके मुस्तकटुकेन्द्रयवैः कृतम्। पिप्पल्यादिकषायन्तु कफजे परिपाचनम्। द्वन्द्वजेषु तु संसृष्टं दद्यादथ विवर्ज्जयेत्। पीताम्बुर्लङ्घितो भुक्तो जीर्णे क्षीणः पिपासितः। मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च। पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम्। दोषप्रकृतिवैकृत्यादेकेषां पक्वलक्षणम्। हृदयोद्वेष्टनं तन्द्रालालास्रुतिररोचकम्। दोषाप्रवृत्तिरालस्यं विबन्धो बहुमूत्रता। गुरूदरत्वमस्वेदो न पक्तिः शकृतोऽरतिः। स्वापः स्तम्भो गुरुत्वञ्च गात्राणां वह्निमार्द्दवम्। मुखस्याशुद्धिरग्लानिः प्रसङ्गी बलवान् ज्वरः। लिङ्गैरेभिर्विजानीयाज्ज्वरमामं विचक्षणः। सप्तरात्रात्परं केचिन्मन्यन्ते देयमौषधम्। दशरात्रात्परं केचिद्दातव्यमिति निश्चिताः। पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते। अचिरज्वरितस्यापि देयं स्याद्दोषपाकतः। भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्। शोधनं शमनीयन्तु करोति विषमज्वरम्। च्यवमानं ज्वरोत्क्लिष्टमुपेक्षेत मलं